International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 88-90
© 2026 IJMH
www.themultijournal.com
Received: 02-07-2026
Accepted: 25-07-2026
Publish : 28-07-2026

**अङ्कुरनागपालः**
अनुसन्धाता (विद्यावारिधिच्छात्रः),
विशिष्टद्वैतवेदान्तविभागः,श्रीलालबहादुरशास्त्री-राष्ट्रीय-संस्कृत-विश्वविद्यालयः

**शोधनिर्देशकः -**
**प्रो.श्रीमुरलीमनोहरपाठकवर्यः**
मान्यः कुलपतिः,
श्रीलालबहादुरशास्त्री-राष्ट्रीय-संस्कृत-विश्वविद्यालयः

**Correspondence:**
**अङ्कुरनागपालः**
अनुसन्धाता (विद्यावारिधिच्छात्रः),
विशिष्टद्वैतवेदान्तविभागः,श्रीलालबहादुरशास्त्री-राष्ट्रीय-संस्कृत-विश्वविद्यालयः

# श्रीराघवकृपाभाष्यदिशा जन्मादि-वेदान्तसूत्रत्रयार्थ-विमर्शः

**अङ्कुरनागपालः, प्रो.श्रीमुरलीमनोहरपाठकवर्यः**

भगवता बादरायणेन वेदान्तदर्शनं सूत्रितम् *"अथातो ब्रह्मजिज्ञासा"* इत्यारभ्य *"अनावृत्तिः शब्दात्"* इत्यन्तम्। तत्र कृते कर्मकाण्डविचारे विज्ञाते कर्मणामनित्यत्वे मुमुक्षुजीवेन शास्त्रनिर्णीतदृष्ट्या श्रीरामचन्द्राख्यस्य सगुणब्रह्मणस्तन्नामरूपलीलाधामस्वभावप्रभावविषयिणी जिज्ञासा कर्त्तव्या— इत्यादिमस्य सूत्रस्याशयः श्रीराघवकृपाभाष्यकारै रामभद्राचार्यस्वामिचरणैः प्रकटितः। परं किंलक्षणं तद्ब्रह्मेत्यपेक्षायाम् *"जन्माद्यस्य यतः"* इति द्वितीयेन सूत्रेण वेदान्तवेद्यस्य ब्रह्मणस्तटस्थलक्षणमुक्तम्, *"शास्त्रयोनित्वात्"* इतितृतीयेण च ब्रह्मणो ज्ञाने शास्त्राणां प्रामाण्यम्। अथ *"तत्तु समन्वयात्"* इति तुरीयेण च ब्रह्मणि शास्त्राणां समन्वयं प्रवदता भगवता सूत्रकारेण लक्षणपरीक्षा प्रवर्तिता। एवमेतत्सूत्रत्रयस्यार्थश्चित्रकूटस्थतुलसीपीठाधीश्वरैर्जगद्गुरुश्रीरामभद्राचार्यपादैः स्वीये 'श्रीराघवकृपा-भाष्ये' महता श्रमेण भगवदनुग्रहेण च निरुपद्रवेण स्वं राघवीयविशिष्टाद्वैतराद्धान्तं पुरस्कृत्य प्रपञ्चितः। अत्राऽस्मिन् शोधलेखे श्रीरामभद्रीयं ब्रह्मसूत्रराघवकृपाभाष्यमनुसृत्य स एवार्थो विमृश्यते।

## " जन्माद्यस्य यतः "[1]

अस्य जन्मादिसूत्रस्य भाष्यकारैर्वर्णकद्वयं प्रकटितम्। तत्रादौ—

### (क) प्रथमं वर्णकम् (जगद्व्यापारपरकम्)

सूत्रेऽस्मिन् **'जन्मादि' 'अस्य' 'यतः'** इति त्रीणि पदानि सन्ति, येषामन्वय आनुपूर्व्या विपरीतक्रमेण सङ्गच्छते—

1. 'यतः' (सर्वनाम, पञ्चम्यन्तम्) = यस्मात्परमकारणात्; यत्-शब्दस्य सापेक्षत्वादत्र प्रथमसूत्रोक्तस्य ब्रह्मपदस्याऽनुवृत्तिः।[2]

2. 'अस्य' (इदं-सर्वनाम्नः षष्ठ्यन्तम्) = एतस्य पुरोदृश्यमानस्य संसारप्रपञ्चस्य। अत्र संसारस्य पञ्च लक्षणानि भाष्यकर्तृप्रोक्तानि; तद्यथा रचनावैविध्ययुक्तत्वम्, त्रिगुणात्मकपरिणामत्वम्, सततम-पवित्रत्वम्, तापत्रयात्मकत्वम्, असारत्वम् (अविचारितरमणीयत्वम्) च।

3. 'जन्मादि' (प्रथमान्तं पदम्): जन्म, स्थितिः, लयश्च। प्रायशः प्राक्तनाचार्योक्त्या तद्गुणसंविज्ञानबहुव्रीहिसमासकल्पनया जगतः स्थितिलययोरध्याहारे गौरवदोषं पश्यन्तो भाष्यकारा नवीनमर्थं चक्रुः—*"जन्म च आदि च इति जन्मादि"*, अत्र आदिशब्दः "अद्भक्षणे"[3] इतिधातोर्निष्पन्नः; तेन 'आदि' नाम प्रलय इति। जन्मप्रलययोः समाहार एव 'जन्मादि'; तयोरन्तराले स्वतोऽन्तर्भूतत्वात्स्थिते-र्जन्मादिपदेन जगत उत्पत्तिस्थितिसंहृतीनामुपलब्धिः।[4] **समर्थितं चैतत्** "भवाप्ययौ हि भूतानां...त्वत्तः"[5] इतिगीतोक्तेः।

### (ख) द्वितीयं वर्णकम् (आद्योत्पत्तिपरकम्)

अपूर्वेऽस्मिन् वर्णके **'जन्म'** (उत्पत्तिः), **'आद्यस्य'** (महासर्गे सम्भूतस्याद्यस्य—ब्रह्मणो हिरण्यगर्भस्य, आकाशमहाभूतस्य वा), **'यतः'** (यस्मात्सकाशात्) इत्येवंरूपेण पदच्छेदः कल्पितः। एषोऽर्थः *"आत्मन आकाशः सम्भूतः"*[6] "हिरण्यगर्भं जनयामास पूर्वम्"[7] इत्यादिश्रुतियुगलमनुसरति।

तर्हि कथं तज्जगत्कर्तृत्वं श्रीरामचन्द्रे सङ्गच्छेत्? इति चेत्, तत्सिद्धान्तितं भाष्यकारैः 'लक्षण-साम्याद्वस्तुसाम्यम्' इति न्यायात्। यद् जिज्ञासाजन्मादिसूत्रलक्षितं परब्रह्म वेदान्तवेद्यम्, तत्

कोसलराजतनयः श्रीरामचन्द्र एव। *"जनयन्देव एकः"* इत्यादिश्रुतौ[8] *"सम्बाहुभ्याम्"* (प्रशस्तद्विभुजयुक्तः) तथा *"सम्पतत्रैः"* (बाणै रावणविनाशकैः) इति विशेषणौ केवलं द्विभुजे नराकारे श्रीराम एव सङ्गच्छेते[9]; नान्यत्र।

ततः समग्रार्थोऽस्य सूत्रस्य—एतस्य विचित्ररचनावतः, सत्त्वादिगुणात्मकस्य, असारस्य तापत्रयजाज्वल्यमानस्य दृश्यमानप्रपञ्चस्य उत्पत्तिस्थितिभङ्गा यस्मात्सर्वशक्तिमतो जगत्सर्वेश्वराद्रामाख्याद्भवन्ति, तदेव ब्रह्म। तत्तु जगतोऽभिन्ननिमित्तोपादानकारणम्। ब्रह्मणः 'चित्' (परा, जीवनाम्नी) 'अचित्; (अपरा, प्रकृतिनाम्नी) इति विशेषणद्वयम्। ब्रह्म च स्वकीयमायाशक्तिभूतायाः 'श्रीसीतायाः' माध्यमेन जगत्कारणं भवति। किञ्च सृष्ट्यादौ सर्वप्रथमोत्पन्नस्याऽऽदिदेवस्य ब्रह्मणो हिरण्यगर्भस्योत्पत्तिः, किं वा समस्तप्रपञ्चादिभूतस्याऽऽकाशस्योत्पत्तिर्यस्मात् परमपुरुषाद्भवन्ति, तद्ब्रह्म—इति।

**"शास्त्रयोनित्वात्"**[10]

सूत्रेऽस्मिंस्तृतीये **"शास्त्रयोनित्वात्"** इति एकपदमेव, तच्च पञ्चम्यन्तमेकवचनम्। इयं पञ्चमी हेत्वर्थे। समासविग्रहात् 'शास्त्रम्' 'योनि' इति पदे लभ्येते। भाष्यकारैस्तत्र शास्त्रपदस्य द्विविधं निर्वचनं कृतम्; *"शासनात् शास्त्रम्"*—यल्लोकेभ्यो कर्त्तव्याकर्त्तव्ये शिक्षयति देशकालाधिकारिभेदेन धर्माधर्मयोः पुण्यपापयोर्वा व्यवस्थापनमुखेन, तत् 'शास्त्रम्' इति। किं वा *"शंसनात् शास्त्रम्"*—यत्पुरुषार्थचतुष्टयस्य धर्मार्थकाममोक्षाख्यस्य शंसनमुपदेशं वा करोति, तदेव 'शास्त्रम्' इति। अत्र विशेषस्तु—स्वतःप्रमाणभूताऽपौरुषेयी श्रुतिः (नित्यानुपूर्वीमयी) मन्त्रब्राह्मणारण्यकोपनिषद्रूपा परतःप्रमाणभूतैर्वेदानुकूलतया लब्धप्रामाण्यै रामायणमहाभारतपुराणसूत्रैश्च शास्त्रपदवाच्या। अथ सूत्रस्थस्य योनि-पदस्य त्रिविधोऽर्थो भाष्यकारैः प्रस्तुतः; प्रतिपादकः, कारणम्, प्रमाणं चेति। एतेनात्र वर्णकत्रयं सम्भवति। तत्र—

**(क) प्रथमं वर्णकम् (प्रतिपादकपरकम्)**

शास्त्रं योनिः (प्रतिपादकम्) यस्य, तद् शास्त्रयोनि (ब्रह्म), तस्य भावः शास्त्रयोनित्वम्; तस्मात् 'शास्त्रयोनित्वात्' इति। एतेन—शास्त्रमेव तस्य जगत्कर्तुर्ब्रह्मणो प्रतिपादकम्। यतो हि जगत्कारणभूतं ब्रह्म केवलं वेदान्तवेद्यम्, अतस्तज्जिज्ञास्यम्—इति सूत्रार्थः फलितः; *"सर्वे वेदा* यत्पदमामनन्ति"[11] इतिश्रुतेर्बलात्।

**(ख) द्वितीयं वर्णकम् (कारणपरकम्)**

"शास्त्राणां योनिः (कारणम्/प्राकट्यस्थलम्) इति शास्त्रयोनि (ब्रह्म), तस्माद् शास्त्रयोनित्वात्" इति। एतेन—अलौकिकहिताहितबोधकस्याऽपौरुषेयवेदशास्त्रस्य योनि (उत्पादकम्), तत्परब्रह्मैव; अतः सर्वज्ञशास्त्रकारणत्वात्तदेव जगन्निमित्तकारणभूतं जिज्ञास्यं च—इति सूत्रार्थः। अत्र मानम् *"अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः..."* इति श्रुतिः।[12]

**(ग) तृतीयं वर्णकम् (प्रमाणपरकम्)**

शास्त्रं योनि (प्रमाणम्) यत्र, तत् = शास्त्रयोनि (ब्रह्म), तस्मात् 'शास्त्रयोनित्वात्' इति। एतेन—यस्मिन् ब्रह्मण्यलौकिके शास्त्रमेव प्रमाणम् [अगतित्वादिन्द्रियाणां निष्फलत्वाच्च प्रत्यक्षानुमानोपमानानाम्][13] तस्यैव जिज्ञासा कर्त्तव्या—इति सूत्रार्थो निश्चितः; *"तं त्वौपनिषदं पुरुषं* पृच्छामि"[14] इतिश्रुतेर्बलात्।

अथास्य समग्रार्थः—ब्रह्म वेदान्तवेद्यं जगत्कारणम्, वेदशास्त्रस्योत्पादकम्, अलौकिकं प्रमाणान्तरावेद्यभूतं चेति मत्वा तदीया जिज्ञासा कर्त्तव्या—इति।

**"तत्तु समन्वयात्"**[15]

सूत्रमिदं त्रिपादात्मकम्; **'तत्' 'तु' 'समन्वयात्'** इति। अत्र भाष्यकारैर्वर्णकत्रिकं प्रस्तुतम्। तत्र—

**(क) प्रथमं वर्णकम् (शास्त्रसमन्वयपरकम्)**

कर्मिभिस्तु वेदानां क्रियामात्रपरत्वमुक्तम्; केवलं यज्ञाङ्गीभूतदेवतास्तुतिपरत्वाङ्गीकाराद्वेदभूतानामुपनिषदां स्वातन्त्र्येण प्रामाण्यं तैस्तिरस्कृतम्। अतो भाष्यकाराः *"तत्तु समन्वयात्"* इत्यत्र तत्-शब्देन ब्रह्मणः शास्त्रप्रमाणकत्वं कथयन्ति। समन्वयशब्दस्यार्थः सम्यगन्वयः; तात्पर्यस्य सम्यगवधारणमित्यर्थः। एतेन—**"तत्"** परब्रह्मणः शास्त्रवेद्यत्वं निश्चितम्। कुतः? **"समन्वयात्"** यतो हि समेषां वेदान्तवाक्यानां[16] परमं तात्पर्यं सम्यग्रूपेण तस्मिन् जगत्कर्तरि परमात्मनि श्रीरामे पर्यवसति, **"तु"** एव; *"सर्वे वेदा* यत्पदमामनन्ति"[17] इतिश्रुतेः। वेदोक्ता अग्निवाय्विन्द्रादिशब्दा अपि छागपशुन्यायेन परम्परया देवाधिदेवे श्रीराम एव पर्यवसन्ति—इति फलितार्थः।

**(ख) द्वितीयं वर्णकम् (शक्तियोगपरकम्)**

ब्रह्मणोऽभिन्ननिमित्तोपादानकारणत्वं विचार्यते चेत्, विशिष्टाद्वैतमते यथा ऊर्णनाभिः (लूतातन्तुः) चेतनांशाज्जालस्य निमित्तं शरीराच्चोपादानं भवति, तथैव ब्रह्म जगत्कारणम्। सूत्रस्थेन समन्वयशब्देन सपत्नीकस्य पतेरिव स्वकीयया मायाशक्त्या सीतया सह रामाख्यस्य ब्रह्मणो जगत्कर्तुर्नित्ययोग उक्तः।[18] अत्र तत्-पदेन जगत्कारणत्वं शास्त्रयोनित्वं च सूच्यते। एतेन—**"तत्"** (ब्रह्मणो रामाख्यस्य जगत्कर्तृत्वं शास्त्रयोनित्वं च, **"तु"** (सर्वथा युक्तम्), यतः **"समन्वयात्"** नित्ययुक्तत्वात्तस्य स्वीयया स्वतोऽभिन्नस्वरूपया मायाशक्त्या भगवत्या सीतया सह—इति फलितार्थः।

**(ग) तृतीयं वर्णकम् (अनुप्रवेशपरकम्)**

तद्ब्रह्म केन प्रकारेण जगत्कारणं भवति? इति चेत्, 'समन्वयात्' इति। अत्र भाष्यकाराः "सम्यगनुप्रवेशम्" [अन्तर्यामितया सर्वत्र प्रवेशम्][19] एवमुदीरयन्ति। एतेन—**"तत्"** (परब्रह्मणो जगत्कारणत्वं युक्तम्), **"तु"** (एव), **"समन्वयात्"** (यतस्तद् अन्तर्यामितया निखिले चराचरे प्रपञ्चे सम्यगनुप्रविष्टम्)—इति सूत्रार्थः। अत्राऽन्तर्यामिब्राह्मणम् "यः पृथिव्यां तिष्ठन्..."[20] इत्यादिकं मानम्। सर्वत्र प्रविश्य नियमनादेव ब्रह्मणो जगत्कारणत्वं सिद्धम्।

एवमस्य सूत्रस्य समग्रार्थः—शास्त्रप्रमाणके परब्रह्मणि श्रीरामे वेदान्तवाक्यानां सम्यग् अन्वयः, स्वीयया मायाशक्त्या सीतया सह तस्य नित्ययोगः, निखिले च प्रपञ्चेऽन्तर्यामितया तस्य सम्यगनुप्रवेशो वर्तन्ते; एतेन तद्धि रामाख्यं ब्रह्म जगत्कारणम्—इति।

अथोपसंह्रियत एतत्सूत्रत्रयानुशीलनेन—प्रपञ्चोऽयं विचित्ररचना-वान् सत्त्वादिगुणात्मकोऽसारस्तापत्रय-जाज्वल्यमानश्च, एतस्यो-त्पत्तिस्थितिभङ्गा यस्मात्सर्वशक्तिमतो जगत्सर्वेश्वराद्रामाख्या-द्भवन्ति, तदेव ब्रह्म। तत्तु जगतोऽस्याभिन्ननिमित्तोपादानकारण-भूतम्, तस्य पुनर्द्वे विशेषणे स्तः; 'चित्' (जीवाख्यम्), 'अचित्' (प्रकृतिसञ्ज्ञम्) च। तच्च ब्रह्म नित्यं स्वकीयमायाशक्त्याऽस्य जगतः कारणम्। अपि च कल्पादौ हिरण्यगर्भस्य, किं वा आदिमस्य भूतस्याऽऽकाशस्य चाप्युत्पत्तिस्तत एव। ब्रह्म वेदान्तवेद्यं जगत्कारणं वेदशास्त्रप्रकटयितृ प्रमाणान्तरावेद्यभूतं च। शास्त्रप्रमाणके परब्रह्मणि तस्मिन् समेषां वेदान्तवाक्यानां सम्यगन्वयः, स्वीयया मायाशक्त्या च तस्य नित्ययोगः, निखिले च प्रपञ्चेऽन्तर्यामितया तस्य सम्यगनुप्रवेशः शास्त्रप्रसिद्धाः। एतेनैव तद्धि ब्रह्म जगत्कारणमिति जन्मादिवेदान्तसूत्रत्रयस्यार्थो निरूपितः।

नास्त्यत्र कश्चन सन्देहलेशावकाशो यच्छ्रीराघवकृपाभाष्ये वेदान्तसूत्राणां नव्यमनुसन्धानं भाष्यकारैरनुगृहीतम्; तन्महत्सौभा-ग्यमस्मदादीनां दर्शनस्ववार्रिपिपासूनाम्। नारायणस्मृतिः॥

**:: सङ्केताक्षराणि ::**

**क.** = कठोपनिषद्। **गी.** = श्रीमद्भगवद्गीता। **तै.** = तैत्तिरीयोपनिषद्। **धातु.** = पाणिनीय-धातुपाठः। **बृ.** = बृहदारण्यकोपनिषद्। **ब्र.सू.** = ब्रह्मसूत्राणि। **श्वे.** = श्वेताश्वतरोपनिषद्। **सू.रा.भा.** = ब्रह्मसूत्र-राघवकृपाभाष्यम्।

**:: सन्दर्भग्रन्थाः ::**

1. 'ईशाद्यष्टोत्तरोपनिषदः'*, पणशीकर वासुदेव लक्ष्मणशास्त्री, चौखम्बा विद्याभवन (वाराणसी), 2010 ई.
   [* सर्वा अप्युपनिषदोऽत्र प्रयुक्ता एतस्मादेवोदाहृता इति ज्ञातव्यम्]
2. 'पाणिनीयधातुपाठः', कनकलाल शर्मा, चौखम्बा संस्कृत सीरिज़ आफ़िस (वाराणसी), 1969 ई.
3. 'ब्रह्मसूत्रेषु श्रीराघवकृपाभाष्यम्', जगद्गुरु श्रीरामभद्राचार्य, श्रीतुलसीपीठ-सेवान्यास (चित्रकूट), 1998 ई.
4. 'श्रीमद्भगवद्गीता' (20), गीताप्रेस (गोरखपुर), 2022 ई.

**पाद टिप्पणी -**

1. ब्र.सू.1.1.2
2. *"समासान्तर्गतोऽपि ब्रह्मशब्दोऽनुवृत्तः सन् प्रथमैकवचनान्ततया विपरिणम्यमानः समानमधिकुरुते"* (सू.रा.भा.पृ.54)
3. धातु.2.1
4. *"जन्मादीत्यत्र...तद्गुणसंविज्ञानं...गौरवास्पदम्; तर्हि...जन्म चाऽऽदी च तयोः समाहारो जन्मादि"* (सू.रा.भा.पृ.54)
5. गी.11.2
6. तै.2.1.1
7. श्वे.3.4
8. तत्र 3.3
9. *"द्यावाभूमी स्वर्गमर्त्यलोकात्मकं जनयन्नेकोऽद्वितीयो भगवान् रामो बाहुभ्यां भुजाभ्यां निक्षिप्तैः सम्पतत्रैर्बाणैर्धमति रावणादीन्निहन्ति ... बाहुभ्यामित्यनेन द्विभुजोपलक्षितः श्रीरामस्तथैको देव इत्यनेन परब्रह्म"* (सू.रा.भा.पृ.59-60)
10. ब्र.सू.1.1.3
11. क.1.2.25
12. बृ.2.4.10
13. *"नैवानुमानप्रसरोऽत्र ज्ञेयः...साफल्यमस्यास्ति न लौकिकेऽपि... लोकोत्तरे ब्रह्मणि नोपमानम्"* (सू.रा.भा.पृ.67-68)
14. बृ.3.9.26
15. ब्र.सू.1.1.4
16. *"अत्र शास्त्रशब्दः प्रकरणानुरोधेन वेदान्तवाक्यपरः...तस्यैव ब्रह्मणि महातात्पर्यसमर्पकत्वेन समन्वयः"* (सू.रा.भा.पृ.74)
17. क.1.2.25
18. *"समन्वयात्ततो ब्रह्मणोऽस्य जन्मादि; मायया भगवतः समन्वयः...पत्न्या समन्वितपतिरिव"* (सू.रा.भा.पृ.80)
19. *"समन्वयः...सम्यगनुप्रवेशः; भगवान्नन्तर्यामित्वेन जगति समनुप्रवेशा-ज्जगज्जन्मादिकारणम्"* (तत्रैव पृ.82)
20. बृ.3.7.3